तन्त्रलक्षणविषयादिकं जैमिनिना एकादशाध्याये न्यरूपि तत एवागन्तव्यं संक्षेपतश्च जैमिनिशब्दे माधवेनोक्तं ३१४१ पृ० दर्शितम्। तत्र शास्त्रे "आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्" "सप्तत्यां किल येऽर्थास्तेऽर्थाः षष्टितन्त्रस्य" सा० का०। २२नीत्यवयवे। "तन्त्रैः पञ्चभिरेतच्चकार मनोरमं शास्त्रम्" पञ्चत०। तदवयवाश्च मित्रभेदमित्रप्राप्तिकाकोलूकीयलब्धप्रणाशपरीक्षितकारकाख्याः। तन्त्रं वेत्ति ठक्। तान्त्रिक तन्त्रवेत्तरि त्रि०। तन्त्रं विहितः ठक्। तान्त्रिक तन्त्रविहिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोःगत" तन्त्रसा० तान्त्रिकी दीक्षा २३वशे च स्वतन्त्रः परतन्त्रः।

**तन्त्रक** त्रि० तन्त्रात् अचिराहृतम् कन्। अभिनवे वस्त्रे अमरः पटे पु० शाट्यां स्त्री इति भेदः। "वसानस्तन्त्रकनिभे सर्वाङ्गीणे तरुत्वचौ" भट्टिः।

**तन्त्रकाष्ठ** न० तन्त्रस्य काष्ठम्। तन्त्रस्य काष्ठभेदे (ताँतेर काटि) प्रभृतौ त्रिका०।

**तन्त्रता** स्त्री तन्त्रस्य भावः तल्। अनेकोद्देशेन सकृत्प्रवृत्तौ यथा तर्पणपूजनाद्यनेककर्मोद्देशेन सकृत्स्नाने कृते सर्वकर्माङ्गस्नानसिद्धिः। तद्विषयोदाहरणं प्रा० त०उक्तं यथा "आग्नेयाष्टकपालैन्द्रदध्यैन्द्रपयोयागानां त्रयाणामाग्नेयाष्टकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिद्धयति तथा नानाब्रह्मवधसत्त्वे सर्वोद्देशेन सकृत् प्रायश्चित्ते कृते सर्वब्रह्मवधजन्यपापनाशः। तन्त्रतायाहेतुश्च अदृष्टार्थैकजातीयकर्मणः कालदेशकर्त्रादीनां प्रयोगानुबन्धिवैधहेतुभूतानामभेदे उद्देश्यविशेषाग्रहः" इति। एवञ्च "स्नातोऽधिकारी भवति दैवे पैत्रे च कर्मणि। पवित्राणां तथा जाप्ये दाने च विधिदर्शिते" इति विष्णूक्तम् "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चनेति" दक्षोक्तञ्च, क्रियाङ्गस्नानं कर्तृसंस्कारद्वारैव तद्दिनकर्त्तव्याशेषकर्मार्थमेकमेव न तु प्रतिकर्म कर्त्तव्यम्" इति रघुनन्दनः अधिकं तन्त्रशब्दे दृश्यम्।

**तन्त्रधारक** पु० तन्त्रं कर्मज्ञापकपद्धतिग्रन्थं धारयति धारि—ण्वुल् इत०। "एकस्तत्र नियुक्तः स्यादपरस्तन्त्रधारकः। तृतीयं प्रश्नकं ब्रूयात् ततः कर्म समाचरेत्" गृह्यपरिशिष्टोक्ते कर्मस्वरूपज्ञापकपुस्तकवाचके। "तन्त्रधारकः पुस्तकधारकः" सं० त० रघुनन्दनः।

**तन्त्रयुक्ति** स्त्री तन्त्रोक्ता आयुर्वेदशास्त्रोक्ता युक्तिः। सुश्रुतोक्ते द्वात्रिंशद्भेदके युक्तिभेदे। ताश्च यथा "अथातस्तन्त्रयुक्तिनामाध्यायं व्याख्यास्यामः। द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति। तद्यथा। अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्द्देश उपदेशः प्रदेशोऽतिदेशोऽपवर्गो वाक्यशेषोऽर्थापत्तिर्विपर्य्ययः प्रसङ्ग एकान्तोऽनेकान्तः पूर्वपक्षो निर्णयोऽनुमतं विधानमनागतावेक्षणम् अतिक्रान्तावेक्षणम्। संशयो व्याख्यानं स्वसंज्ञा उदाहरणं निर्वचनं निदर्शनं नियोगो विकल्पः समुच्चय ऊह्यमिति अत्रासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते। वाक्ययोजनमर्थयोजनञ्च। भवन्ति चात्र श्लोकाः। असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्। स्ववाक्यानां सिद्धिरपि क्रियते तन्त्रयुक्तितः। व्यक्ता नोक्तास्तु ये ह्यर्था लीना ये चाप्यनिर्मलाः। लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम्। यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा। प्रबोध्यस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः। यमर्थमधिकृत्योच्यते तदधिकरणं १यथा रसं दोषं वा। येन वाक्यं युज्यते स योगः २। यथा तैलं पिबेच्चामृतवल्लिनिम्बहिंस्राभयावृक्षकपिप्पलीभिः। सिद्धं बलाभ्याञ्च सदेवदारु हितञ्च नित्यङ्गलगण्डरोगी"। सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः। योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः ३। अपरिमिताश्च पदार्थाः। यथा स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणामर्थानामुपपत्तिर्दृश्यते तत्र योऽर्थः पूर्वापरयोगसिद्धोभवति स ग्रहीतव्यो यथा। वेदोत्पत्तिं व्याख्यास्याम इत्युक्ते सन्दिह्यते बुद्धिः। कतमस्य वेदस्यायमुत्पत्तिं विवक्षुरिति। ऋग्वेदादयश्चयोवेदास्तत्र पूर्वापरयोगमुपलभ्य विद—विचारणे विन्दत्येतयोश्च धात्वोरनेकार्थयोः प्रयोग इति पश्चात्प्रतिपत्तिर्भवति। आयुर्वेदोत्पत्तिमयं विवक्षुरित्येवं पदार्थः। यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः४। यथा मृत्पिण्डोऽद्भिः प्रक्लिद्यते यथा माषदुग्धप्रभृतिभिर्व्रणः प्रक्लिद्यत इति। समासकथनमुद्देशः५। यथा शल्यमिति। विस्तरवचनं निर्द्देशः६। यथा। शारीरमागन्तुकं चेति। एवमित्युपदेशः७। यथा "तथा न जागृयाद्रात्रौ दिवा स्वप्नञ्च वर्जयेत्" अनेन कारणेनेत्युपदेशः। यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति। प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः८। यथा देवदत्तस्यानेन शल्य-